# विश्वशान्तेः स्थापनायां संस्कृतस्यावदानम्

डा० धनञ्जय वासुदेव द्विवेदी

सहायक प्रोफेसर, संस्कृत विभाग,

डा० श्यामा प्रसाद मुखर्जी विश्वविद्यालय, राँची

संस्कृतभाषा विश्वस्य प्राचीनतमासु भाषासु अन्यतमा एतद्बुधैः सर्वथा स्वीकृतम्। संस्कृतवाङ्मयं विश्वजनीनं सकलजाड्यान्धकारापहं सर्वविधज्ञानप्रकाशप्रदायकं विपुलमङ्गलकरं विश्वार्तिहरणशीलं सर्वोपकारपरायणं परमस्वस्त्ययनं चास्ते। वाङ्मयेऽस्मिन् विशालवैदिकसाहित्यं विपुलं च लौकिकसाहित्यं विद्यते। संस्कृतभाषा भारतयानामनुपममक्ष्य्यं च धनं विद्यते। एतस्यां भाषायां तत्सर्वं ज्ञानविज्ञानं वरीवर्ति यत् न केवलं मानवकल्याणायैवापितु विश्वकल्याणाय पर्याप्तं स्यात्। जीवजगतः सम्पूर्णाः विषयाः संस्कृतवाङ्मयार्णवे सन्निहिताः वर्तन्ते। संस्कृते प्राक्तनमनीषिभिः जीवनस्य सम्यक् चिन्तनं प्रतिपादितम्। विविधसामयिकसमस्यानां निवारणाय संस्कृतसाहित्यकाराणां दृष्टिः परमप्रवीणा। प्रवर्तमानसमये याः परिगणिताः समस्याः सन्ति तासां निवारणविधिरपि संस्कृतसाहित्ये प्रतिपादितो दृश्यते। वस्तुतः भारतीयभाषाणां जननी विश्वस्य समस्यासमाधानसक्षमा विद्यते। विश्वेऽस्मिन् मानवजीवने प्रतिदिनमेका जटिलाः समस्या आगच्छन्ति यासां विना जीवनं सुखमयं न भवति।

समस्यास्तु सन्ति बहवः। तासु समस्यासु विश्वशान्तेरभावः प्रमुखा समस्या वर्तते। साम्प्रतिके समये जगदिदम् आधिव्याधिपीडितं दुःखदावाग्निदग्धम् अभावग्रस्तं चिन्तासहस्रनिचितम् अविश्वासपिशाचक्षुब्धं नृशंसकर्मसंत्रस्तम् अन्नाद्यभावविशीर्णचित्तमं क्षुत्पिपासाशीविषसन्दष्टं च संलक्ष्यते। देशे विदेशे समस्ते भूमण्डले क्रान्तेर्विद्रोहस्य नरसंहारस्य च कारुणिकं दृश्यं प्रेक्ष्यते। न कुत्रचित् कर्णगोचरतामायाति शान्तेर्नामापि। चारित्रिकं पतनम् अनुदिनं संवर्धमानं विलोक्यते। मानवः अद्य मानवमपि मानवेतरदृष्ट्या पश्यति। अर्हणीयां पारस्परिकी घृणां द्वेषभावञ्च मनसि प्रतिष्ठापयति। सन्देहस्य अविश्वासस्य च सर्वत्रैव साम्राज्यं प्रेक्ष्यते। शान्तेर्नामापि न श्रुतिपथमुपायाति। अशान्तेर्मूलं स्वार्थलिप्सा स्वार्थपरता च। विज्ञानस्य दुरुपयोगोऽपि अशान्तेर्मूलम्। सर्वविधाऽपि हिंसा अशान्तेर्जननी। सर्वोऽपि

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

लोकस्त्रासादीनां संहाराय भयानां विध्वंसाय अविश्वासस्य चापगमाय जीवने सुखशान्तेर्मूलं किमपि तत्त्वं कामयते। परं तत् तत्त्वं शान्तिश्च कथमिव लभ्या विश्वशान्तिमन्तरेण। यत्र शान्तेर्निवासस्तत्रैव सुखं वैभवं शिक्षा उन्नतिः कलाविकासः धर्मचर्चा संस्कृतिसमुदयः सभ्यतोत्कर्षः जीविकोपलब्धिः सौकर्यं च।

अस्यां स्थितौ संस्कृतसाहित्यस्यावगाहनम् अत्यावश्यकम्। यदा वयं विश्वस्मिन् शान्तिस्वरूपमधिकृत्य किमपि विचारयामस्तर्हि नूनमिदमवगतं भवति यद् यदि सर्वात्मना केचन शान्तिं वाञ्छन्ति तर्हि संस्कृतवाङ्मयस्य अध्ययनमत्यावश्यकम्। संस्कृतसाहित्येषु प्रतिपादितानां सिद्धान्तानाम् अनुसरणं कृत्वा एव शान्तेः स्थापना भविष्यति। संस्कृतसाहित्ये सर्वत्र विश्वकल्याणाभिलाषः दरीदृश्यते। सर्वत्र सार्वभौमहितभावना वरीवर्ति।

मानवसभ्यतायाः ऊषालग्नतः एव मानवजातेः विश्वहितैषणा यद्देशतः समुद्भूता आसीत् तदधिष्ठानं हि अस्माकमियं पवित्रभारतभूमिः। भारतवर्षे काव्यं वा शास्त्रं वा दर्शनं वा अन्यद् वा यद् ज्ञानविषयकं तत् सर्वं मानवतामाधारीकृत्यैव आलिखितम्। भारतीया दृष्टिः पूर्णमानवतायाः एव उद्गात्री। एषा दृष्टिः संस्कृतमाधारीकृत्यैव विलसति। अतो नीतिगुम्फिते संस्कृतवाङ्मये समन्वयभावनायाः त्यागभावनाया विश्वबन्धुत्वादिमानवतासाधकस्य च तत्त्वमुपलभ्य वैशद्येनालोचनं समुपलभ्यते यदाश्रित्य संकीर्णता तथा आत्मकेन्द्रियता अपाकर्तुं शक्यते।

वैदिकमन्त्रेषु समष्टिभावनायाः प्राधान्यं विराजते। मन्त्रद्रष्टारो ऋषयः केवलं व्यष्टेः कल्याणार्थं परमेश्वरं न प्रार्थयन्ति अपितु सम्पूर्णसमष्टेः मङ्गलार्थं जगदीश्वरस्याशीर्वादं कामयन्ते। ते विमलमतयः समस्तविश्वस्य सुखसमृध्यर्थं भगवन्तं स्तुवन्ति। यजुर्वेदे एको ऋषिः इत्थं सविस्तरं प्रार्थयति-हे देव सवितर त्वम् अस्माकं सर्वेषां जनानां सकलपापानि अपहर दूरे गमय च। अस्मत्कृते च यद् यद् वस्तु कल्याणकरं भवेत् तत्तत् अस्माकं सन्निधौ आगमय-

विश्वानि देव सवितर्दुरितानि परासुव।

यद् भद्रं तन्न आ सुव।।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

आधुनिकयुगे विश्वबन्धुत्वस्य सहयोगस्य सह-अस्तित्वस्य च महती आवश्यकता अनुभूयते। एतेषां भव्यभावानाम् अमृतमयोपदेशाः वेदेषु बाहुल्येन प्राप्यन्ते। यथा-'पुमान् पुमांसं परिपातु विश्वतः'। अर्थात् मानवमात्रस्येदं कर्तव्यमस्ति यत् एकोऽपरस्य रक्षां साहाय्यं च करोतु। मानवो न स्यात् स्वार्थपरायणः। सर्वे जनाः परस्परं मित्रवद् व्यवहरेयुः। एतादृशी मनोज्ञभावना यजुर्वेदस्य मन्त्रेऽस्मिन् द्रष्टुं शक्यते-

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।**

**मित्रस्य चक्षुषा समीक्षामहे।।**

अर्थात् अहं मित्रदृष्ट्या सर्वान् प्राणिनः पश्येयम्। वयं सर्वे च परस्परं मित्रदृष्ट्या पश्येम। अथर्ववेदेऽपि ऋषिः भूतभावनं परमात्मानं प्रार्थयति यत् हे भगवन् मह्यं तादृशं ज्ञानं प्रदेयं येनाहं नयनपथवर्तिनां कृते तथा ये च दृग्गोचराः न सन्ति तेषामपि कृते सद्भावनां धारयेयम्-

**यांश्च पश्यामि याँश्च न।**

**तेषु मा सुमतिं कृधि।।**

महती उदात्तावधारणेयं खलु सामान्यतया 'दृश्यमाने भवेत् प्रीतिः, सौहृदं नास्त्यपश्यतः' इत्येव दृष्टिः प्राप्यते जनेषु। परन्तु ऋषीणां धारणा विलक्षणा वर्तते। तेषां दृष्टौ संसारस्य सर्वे प्राणिनः – भवन्तु ते दृश्या अदृश्या वा- सौहार्दभाजः सन्ति। एतादृशीमेवोदात्तभावानां प्रथयन् जगतः सर्वान् मानवान् इत्थमुदिशति-

**समानी व आकूतिः समाना हृदयानि वः।**

**समानमस्तु वो मनो यथा सुसहासति।।**

अर्थात् संसारस्य मनुष्याणां यदि चित्तवृत्तिः हृदयं मनश्च समानानि स्युः तदैव विश्वस्य सर्वे प्राणिनः परस्परं सौहार्द्रपूर्वकं स्थातुं शक्नुवन्ति।

अथ च ऋग्वेदे-

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

**देवा भागं यथा पूर्वे सं जनाना उपासते।।**

विश्वस्य शान्त्यर्थं कल्याणार्थं च एतादृशी भावना नितान्तमपेक्षिता। मन्त्रस्यास्य गूढार्थोऽस्ति- हे मानवाः यथा अतिप्राचीनकालादेव दिव्यशक्तिसम्पन्नाः सूर्यचन्द्रादिदेवाः परस्परम् अविरोधभावेन प्रेम्णा अहर्निशं स्वकार्यं सम्पादयन्ति तथैव यूयमपि समष्टिभावनया प्रेरिता भूत्वा यगपत् स्वकार्येषु प्रवृत्ताः भवन्तु, ऐकमत्या तिष्ठन्तु परस्परं सद्भावेन च व्यवहरन्तु। शिवेतरक्षतये नान्यः पन्थाः।

संस्कृतवाङ्मयस्याध्येता सार्वभौमहितसाधनाय प्रार्थनां करोति-

**मधु वाता ऋतायते मधु क्षरन्तु सिन्धवः। माध्वीर्न सन्त्वोषधीः।।**

**मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः।मधु द्यौरस्तु नः पिता।।**

**मधुमान्नो वनस्पतिर्मधुमाँऽस्तु सूर्यः।माध्वीर्गावो भवन्तु नः।।**

स भगवन्तं याचते-'धियो यो नः प्रचोदयात्'। ऋषेः कामना प्राणिनामार्तिनाशाय योगक्षेमाय च भवति-

**न त्वहं कामये राज्यं न सौख्यं न पुनर्भवम्।**

**कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्।।**

अत एवोक्तं मनुना-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्याः सर्वमानवाः।।**

श्रीदुर्गासप्तशत्यां शक्रादयो देवा अपि विश्वस्य कल्याणार्थं तस्य परिपालनार्थं सुखसमृध्यर्थं च परमेश्वरी बहुशःनिरूपयन्ति प्रार्थयन्ति च-'तां त्वां नताः स्म परिपालय देवि विश्वम्', 'देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री', दारिद्र्यदुःखभयहारिणि का त्वदन्या,सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता', 'दुर्वृत्तवृत्तशमनं तव देवि शीलम्', त्रैलोक्यमेतदखिलं त्रातं त्वया', 'देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य।', 'विश्वेश्वरि त्वं

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

परिपासि विश्वम्', 'पापानि सर्वजगतां प्रशमं नयाशु, उत्पातपाकजनिताश्च महोपसर्गान्', 'सर्वाबाधाप्रशमनं त्रैलोकस्याखिलेश्वरि, एवमेव त्वया कार्यमस्मदवैरिविनाशनम्।'

प्राचीनैर्भारतीयैर्ऋषिभिर्महर्षिभिः श्च सततमेवोदीरितं यत् सर्वभूतहितसाधनम् अस्माकं लक्ष्यम्। तत्र राष्ट्रदेशादिभेदो विपज्जनक एव। यदा स्वार्थबुद्धिर्हीयते तदैव देवत्वं जागर्ति। वेदेषु यज्ञप्रक्रियाया एतदेव महत्त्वं यत् तत्र स्वार्थपरिहारपूर्वकं परार्थसाधनं शिक्ष्यते। सर्वेऽपि देशीया विदेशीया वा एकस्यैव परमात्मनः पुत्राः। तस्मात् परस्परं भ्रातरः एकस्यैव विश्वपरिवारस्य सदस्याः। इतीयं भ्रातृत्वस्य भव्यभावना एव विश्वबन्धुत्वम्। सर्वे जनाः एकेनैव स्नेहसूत्रेण आबद्धाः। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा'- इत्युपनिषद्वचनानुसारम्- 'एक एव विश्वात्मा विश्वप्राणिनां हृदि सन्निविष्टः। अयमेव सिद्धान्तः श्रीमद्भगवद्गीतायामपि समर्थितः-'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति, भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।' तत्र किं कारणं भेदप्रथनम्। यदाऽभेददृष्टिः प्रवर्तते तदा जगदिदं स्वर्ग इव चकास्ति। न तत्र मोहशोकादेवसरः न च तदा विजिगुप्सा विचिकित्सा वा बाधते। एकत्वबुद्धौ न दुःखाग्निलेशोऽपि क्लेशलवोऽपि च। अतएव यजुर्वेदे प्रोच्यते-

**यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विचिकित्सति।।**

विविधवादविवादविप्रतिपत्तिबहुलेऽपि लोके अहिंसाया महत्त्वविषये सर्वेषां निगमागमानां ऐकमत्यम्। अहिंसाया जीवनोपयोगित्वम् आश्रित्यैव प्राचीनैः ऋषिभिर्महर्षिभिः शास्त्रकारैश्च तस्योपादेयत्वम् उद्घोष्यते। अहिंसैव स गुणो येन विश्वबन्धुत्वं विश्वप्रेम विश्वहितसाधनं च सम्भाव्यते। अहिंसैव धर्ममार्गः। अहिंसायाः परिपालनार्थमेव भगवान् बुद्धः भगवान् महावीरः महात्मा गांधिश्च स्वजीवनं समर्पयामासुः। भगवता मनुनाऽहिंसाया उपयोगित्वं प्रतिपादयता निगद्यते यद् अहिंसयैव मानवैः सर्वमपि कार्यं साध्यम्। मधुरया वाचा यथा कार्यसिद्धिः सम्भाव्यते न तथा प्रकारान्तरेण। एवं स्वार्थपरार्थसाधनेन सममेव धर्मपरिपालनमपि सिध्यति-

**अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

**वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता।।**

अहिंसायाः शत्रवोऽपि मित्राणि भवितुं शक्यते। क्रूरकर्मा जनाः अपि सरलहृदयाः भवन्ति। अहिंसाबलेन असम्भवान्यपि कार्याणि सिध्यन्ति। अहिंसा कटुभाषणं परद्रोहवृत्तित्वं च निषिध्यते। यथोक्तं मनुना-

**नारुंतुदः स्यादार्तोऽपि न परद्रोहकर्मधीः।**

**ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत्।।**

अहिंसाया गौरवम् अवलोक्य मनुना प्रतिपाद्यते यत् स्वसुखसाधनाय न प्रणिवधम् आचरेत्। हिंसको नेह न चामुत्र सुखम् अश्नुते-

**योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया।**

**स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते।।**

यदि जगति हिंसायाः ताण्डवनृत्यं स्यात्तर्हि न कोऽपि नरः देशो वा शान्त्या सुखेन वा स्थातुं शक्नोति। अहिंसाबलेनैव स्वस्य लोकस्य च कल्याणं भविष्यति। अहिंसाशस्त्रेणैव भारतदेशः पराधीनतां विहाय स्वतन्त्रतामलभत।

समाजस्य देशस्य राष्ट्रस्य विश्वस्य सर्वविधसमुन्नत्यै विचारसाम्यं मतैक्यं सामञ्जस्यं चाभीष्टम्। विचारसाम्ये एव समवेतत्वं समन्विता कार्यवृत्तिश्च।

परोपकरणं लोकानुग्रहसाधनेन परदुःखनिवारणेन च सकले लोके आत्मीयत्वं साधयति। उक्तं च यजुर्वेदे-

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद् विजानतः।**

परोपकारेणैव विश्वबन्धुत्वं समाजसेवित्वं देवत्वं च सिध्यति। स्वत्वपरत्वभावपरित्यागेनैव उदारचरितत्वं विश्वबन्धुत्वं च संसाध्यते। उक्तं च-

**अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

शास्त्रेषु परोपकारः प्रतिपदं प्रशस्यते, अनुमोद्यते च। प्राणैरपि धनैरपि परोपकारः कार्यः। न च परोपकारसदृशं पुण्यं यज्ञशतेनाऽपि सम्भाव्यते-

**परोपकारः कर्तव्यः प्राणैरपि धनैरपि।**

**परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि।।**

अस्माकं वेदशास्त्रदर्शनादीनि सर्वाणि मानवतायाः परिपोषकाणि वर्तन्ते। परपीडनं कदापि न समर्थ्यते-

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**

**परोपकारः पुण्याय पापाय परपीडनम्।।**

आत्महिताय जगद्धिताय च सदाचारादिकर्माचरणीयम्। तथा हि स्मृतिः-आचारः परमो धर्मः इति। सदाचारमधिकृत्यैव अखिलं परिमण्डलं मधुमयं भवति, कृत्स्नं जगच्चामृतमयम्। सदाचारात् सदैव मैत्री जायते। अनार्यजुष्टमार्गतः वैरितैव जायते। अत एव उक्तम्-

**न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।**

**व्यवहारेण मित्राणि जायन्ते रिपवस्तथा।।**

अथर्ववेदीयभूमिसूक्तस्य प्रासङ्गिकता वैश्विकचिन्तने वरीवर्त्तत एव। भूमिं स्नेहशीलामातृरूपेणोपस्थाप्यते। वयं सर्वे मानवास्तस्याः पुत्राः-

**माता भूमिः पुत्रोऽहं पृथिव्याः।**

प्राक्तनैः साक्षात्कृतधर्मभिः ऋषिभिः श्रूयते वयं समग्रस्य विश्वस्य वार्ताम्। पृथिवी अस्ति सर्वेषां गृहमिव। अत्र नैके जनाः समभावेन निवसन्ति। सर्वैरनुभूयते पृथिवीं प्रति मातृभावम्। उपदिश्यते अथर्ववेदे-

जनं विभ्रती बहुधा विवाचसं नानाधर्माणं पृतिवी यथौकसम्।

यजुर्वेदः उद्घोषयति-

**यत्र विश्वं भवत्येकनीडम्।**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

वस्तुतः वैदिकः समाजः समत्वभावस्य पोषक आसीत् जनानां सांस्कृतिकजीवने भेदभावस्यावकाशो नासीत्। समाजे 'अयं ज्येष्ठोऽयं कनिष्ठः अयं लघुरयं महान् अयं नीचकुलोत्पन्नोअयमुच्चकुलोत्पन्नः' इत्याद्यात्मिका या भेदभावना सैव वस्तुतः विद्वेषस्य विक्षोभस्य विद्रोहस्य च जननी वर्तते यया बन्धुत्वभावना खण्डिता जायते। अत एव सम्यग्गुपदिष्टं ऋषिणा वेदमन्त्रे-

**अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधु सौभगाय।**

**युवा पिता स्वधारुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः।।**

अत्र एतदपि विज्ञापितं यदेक एव परमेश्वरः सर्वेषां पिता, एका एव स सुदुघा प्रकृतिः सर्वेषां माता। अत एकपितृका-एकमातृकाश्च सर्वे मनुष्याः परस्परं भ्रातर एव,एकस्यैव च परिवारस्य सदस्या एव। तस्मान्नास्ति क्वचिदपि भेदभावस्यावकाशः।

अत एव वयं सर्वे भ्रातरो भगिन्यश्च परस्परम्। तर्हि अस्मासु कथं विभेदो समजनि। भारतवर्षस्य प्रत्येकं भागेषु साम्प्रतं कोलाहलः श्रूयते। विभेदनाशे अथर्ववेदीयसूक्तमेव प्रमाणं भवेत्।

जीवनधरणार्थं सर्वेषां प्राणिनां कृते शुद्धान्नजलव्यवस्था स्यात्। अथर्ववेदे तदेव काम्यते-

**समानी प्रपा सह वो अन्नभागः समाने योक्त्रे सह वो यनज्मि।**

अत्रैव सर्वोदयभावना उदीरिता भवति। वक्तुं युज्यते यद् वेदेषु एषाऽवधारणा प्रथमं समायाति। अतः स्वार्थभावना सर्वथा परित्याज्या। सौहार्दस्य सौख्यस्य च वृद्ध्ये त्यागभावना एव श्रेयस्करी। नितान्तमुपयोगितां धारयति यजुर्वेदस्यायमुद्घोषः-

**तेन त्यक्तेन भूञ्जीथाः मा गृधः कस्यस्विद्धनम्।**

यदा त्यागस्य भावना जागरिता भवति तत्रैव शान्तिः समुपलभ्यते। यदि त्यागमूला प्रवृत्तिः जगति सञ्जायेत तर्हि नूनमेव समागच्छेत्। वैदिकसंस्कृतौ सर्वकार्येषु विहितं यज्ञस्य प्रावधानमपि त्यागभावनाया एवं प्रतीकभूतम्। यजुर्मन्त्रेषु तु बलमन्नं सकलं च वित्तजातं यज्ञेनैव सङ्कल्पितम्।

संस्कृतसाहित्ये सर्वेषां धर्माणां मूलमेकं कथितम्। सर्वान् धर्मान् प्रति समभावः प्रतिपादितः। ऋग्वेदे उल्लिखितम्- एकं सद् विप्राः बहुधा वदन्ति। संस्कृतवाङ्मयस्य सन्देशः कस्मैचित् जातिविशेषाय

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

देशविशेषाय वा नास्ति परं सर्वेषां कल्याणाय अभ्युदाय च सन्देशोऽस्ति। एतस्मिन् सन्दर्भे-सर्वे भवन्तु सुखिनः।

आध्यात्मिकीभावनाप्रधाने समग्रसंस्कृतवाङ्मये समतायां विश्वासो दरीदृश्यते। अस्माकं शास्त्रेषु काव्यादिग्रन्थेषु च समताया भूयिष्ठं महत्त्वं प्रतिपादितमास्ते। तस्मादेव अस्माकं देशः कदापि केनापि सह विषमतामयं व्यवहारं नाचरिष्यत्। रामायणमहाभारतपुराणादिग्रन्थाः तथ्यस्यास्य महान्तः साक्षिणः सन्ति। यः पूर्णरूपेण समदर्शी भवति स एव सर्वकर्मकुशलः सर्वोत्कृष्टो योगी प्रियश्च भगवद्भक्तः। भगवान् गीतायां साम्ययोगम् उपसंहरन् कथयति-

**आत्मौपम्येन सर्वत्र सनं पश्यति योऽर्जुन।**
**सुखं वा यदि वा दुःखं स योगी परमो मतः।।**

अन्यत्रापि एतादृशी परमोदात्तभावना प्राप्यते।

तथा हि

**मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति।।**

कामोपभोगार्थं योऽन्यायेन धनोपार्जनं करोति, आवश्यकतातिरिक्तं धनसम्पत्तिमात्मसात् करोति, समाजस्य शोषणं करोति स महापापी स्तेनश्चास्ते। अतः स सर्वथा दण्डनीय इति समादिशति। भगवान् वेदव्यासः स्वसर्वोत्कृष्टे श्रीमद्भागवतमहापुराणे उद्घोषयति-

**यावद् भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्।**
**अधिकं यो हि मन्येत स स्तेनो दण्डमर्हति।।**

महर्षिमिमं विहाय विश्वस्य न कोऽप्यन्यः साम्यवादी विचारको भवितुमर्हति य एतादृशीं सर्वोत्कृष्टां साम्यवादिविचारधारां कल्पयेत्। एतादृशः साम्यवादी न भूतो न भविष्यति। अस्माकं देशस्य संस्कृतशास्त्रपारंगतः मनीषी परोपकारं कामयते। स कदापि अन्यस्य कस्यचिज्जनस्य सम्पत्तिं न वाञ्छति। 'परोपकाराय सतां विभूतयः', आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्', 'परोपकारजं पुण्यं न स्यात्

क्रतुशतैरपि', धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्', 'परोपकारशून्यस्य धिङ् मनुष्यस्य जीवितम्'। इत्थं संस्कृतवाङ्मयं त्यागप्रधानं परोपकारपकम् अध्यात्मपरं च साम्यवादं विवृणोति समर्थयति च। यथा रघुवंशिनो राजानः त्यागार्थं सम्भृतार्थाः भवन्ति स्म तथैव सर्वैः करणीयम्। ईशावास्योपनिषद् व्यादिशति-

**ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।**

भगवान् कृष्णः कथयति-

**इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।।**

*************

**भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्।।**

एतादृश एव साम्यवादः श्रेयस्करः।

मनुना विश्वकल्याणार्थं दशविधधर्मलक्षणं निर्दिषटम्-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**

एते सन्ति मानवताधायकाः उपायाः। इमे मानवधर्माः विश्वस्य सर्वेषां धर्मावलम्बिनां विभिन्नसम्प्रदायसम्बद्धानां च कृते परमोपयोगिनः सन्ति। सर्वेषामभ्युदयनिःश्रेयससिद्धिकरा इमे। एतेषां परिपालनेन मनुष्यस्य परिष्कारो भवति, चरित्रशुद्धिर्भवति, कामक्रोधलोभमोहमात्सर्यरागद्वेषादयो दोषा दूरी भवन्ति। चरित्रवानेव साम्यवादी समदर्शी च भवितुमर्हति। अस्माकं वाङ्मये चरित्रशुद्धौ सम्यक् ध्यानं दीयते। मानवो वृत्तेनैव श्रेष्ठत्वं भजते न तु धनेन न च विद्यया। अत एवोक्तं भगवता व्यासेन-

**न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः।**

**अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते।।**

तस्माद् वृत्तं सदा रक्षणीयम्-

**वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः।।

संस्कृतवाङ्मये यजुर्वेदे वर्णितेन 'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिः....' अनेन प्रख्यातमन्त्रेण पृथिवी-अन्तरिक्ष-द्युलोकेषु जलौषधिवनस्पतिप्रभृतिषु सर्वत्रैव शान्त्यै कामना कृता। संस्कृतसाहित्ये शान्तेः उद्बोधकः प्रेरणादायकः मानवीयभावनासु जागृतेः शान्तिदायकचेतनायाश्च प्रबोधकः अद्वितीयः मन्त्रोऽयं वर्तते। नान्यत्र ईदृशमुदाहरणं लभ्यते। एवं संस्कृतसाहित्ये वर्णितानां सिद्धान्तानां सन्देशानाञ्चानुकरणेन इदं कथितुं शक्यते यद् विश्वशान्त्यै संस्कृतवाङ्मयस्य बहुयोगदानं भवितुं शक्नोति। संस्कृतवाङ्मयस्य सार्वभौमकल्याणभावना विश्वप्रख्याता। यदि वाङ्मयस्यास्य सर्वत्र यथोचितं प्रचारो भवेत् तर्हि विश्वस्य आशातीतं कल्याणं भवेत्।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi